# श्रीसोमनाथसंस्कृतयुनिवर्सिटी ,वेरावलम्

## सत्रान्तपरीक्षा – एप्रिल-२०१९

| | | |
|---|---|---|
| कक्षा- शास्त्रितृतीयवर्षम्(SEM- 6) | प्रश्नपत्रम् – ५ | गुणाः - ७० |
| विषयः - नव्यव्याकरणम् | कोड – CC.3.6.11 | समयः - ११ तः ०२ |
| दिनाङ्कः - ०३-०४-२०१९ | सन्दर्भग्रन्थः – परिभाषेन्दुशेखरः वाक्यपदीयञ्च | | |

**प्रथमान्वितिः**

**प्रश्नः-१ निम्नलिखितासु द्वयोः परिभाषयोः सप्रसङ्गं व्याख्या कार्या** **१०**

(१) पुरस्तापवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान् |

(२) मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान् |

(३) अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति |

**प्रश्नः२ निम्नलिखितयोरेकस्याः परिभाषायाः सप्रसङ्गं व्याख्या कार्या |** **१०**

(१) येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति |

(२) उपसञ्जनिष्यमाणनिमित्तोऽप्यपवाद उपसञ्जातनिमित्तमप्युत्सर्गं बाधत इति |

**द्वितीयान्वितिः**

**प्रश्नः-३ निम्नलिखितासु द्वयोः परिभाषयोः सप्रसङ्गं व्याख्या कार्या** **१०**

(१) अपवादो यद्यन्यत्र चरितार्थस्तर्ह्यन्तरङ्गेण बाध्यते |

(२) अभ्यासविकारेषु बाध्यबाधकभावो नास्ति |

(३) ताच्छीलिकेषु वाऽसरूपविधिर्नास्ति |

**प्रश्नः-४ निम्नलिखितासु द्वयोः परिभाषयोः सप्रसङ्गं व्याख्या कार्या** **१०**

(१) क्तल्युट्तुमुन्खलर्थेषु वाऽसरूपविधिर्नास्ति |

(२) लादेशेषु वाऽसरूपविधिर्नास्ति ।

(३) उभयनिर्देशे पञ्चमीनिर्देशो बलीयान् |

## तृतीयान्विति:

**प्रश्न:-५ निम्नलिखितासु कारिकासु कारिका सप्रसङ्गं व्याख्येयम् |** १०

(१) नित्यत्वे कृतकत्वे वा तेषामादिर्न विद्यते |
प्राणिनामिव सा चैषा व्यवस्थानित्यतोच्यते ||

(२) नानर्थिकामिमां कश्चिद् व्यवस्थां कतुमर्हति |
तस्मान्निबध्यते शिष्टै: साधुत्वविषयास्मृतिः ||

(३) निर्ज्ञातशक्तेद्रव्यस्य तां तामथक्रियां प्रति |
विशिष्टद्रव्यसम्बन्धे सा शक्ति: प्रतिबध्यते ||

**प्रश्न:-६ निम्नलिखितासु कारिकासु कारिकाद्वयं सप्रसङ्गं व्याख्येयम् |** १०

(१) यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभि: |
अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते ||

(२) परेषामसमाख्येयमभासादेव जायते |
मणिरूप्यादिविज्ञानं तद्विदां नानुमानिकम् ||

(३) अरणिस्थं यथा ज्योति: प्रकाशान्तरकारणम् |
तद्वच्छब्दोऽपि बुद्धिस्थ: श्रुतीनां कारणं पृथक् ||

**प्रश्न:-७ निम्नलिखितेषु केषाञ्चित् दशप्रश्नानां लघूत्तरं लेख्यम् |** १०

(१) ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्याय इत्यत्र दधिदानस्य केन बाधो भवति ?

(२) सत्यपि संभवे बाधनं भवति न वा ?

(३) तिसृ+आम् इत्यवस्थायां रेफादेशं बाधित्वा नुडागमो भवति, अत्र किं सूत्रं प्रमाणम् ?

(४) बाधके प्रवृत्ते यदि उत्सर्गशास्त्रस्य प्रवृत्तिर्वर्तते , तर्हि उत्सर्गशास्त्रस्य प्रवृत्तिर्भवति वा न भवति ?

(५) क्वचिदपवादविषयेऽपि उत्सर्गोऽभिनिविशते/न अभिनिविशते ?

(६) अयज+इ+इन्द्रम् इत्यवस्थायां कस्य कस्य सूत्रस्य प्रवृत्तिर्भवति ?

(७) अयज+इ+इन्द्रम् इत्यवस्थायां प्राप्तयोः “आद्गुणः” , “अकः सवर्णे दीर्घः” सूत्रयोर्मध्ये किं सूत्रं बहिरङ्गम् ?

(८) अजीगणत् कस्य लकारस्य रूपमस्ति ?

(९) “दीर्घोऽकितः” सूत्रे कृतम् अकिद्ग्रहणं कस्याः परिभाषायाः ज्ञापकं वर्तते ?

(१०) ‘हसितं छात्रस्य’ इत्यत्र ‘हस्’ धातोः कस्मिन् अर्थे ‘क्त’ प्रत्ययो विद्यते ?

(११) साधवः शब्दाः कुत्र साधनं भवति ?

(१२) धर्मः तर्केण व्यवतिष्ठते / न व्यवतिष्ठते ?

(१३) योगिनः केन चक्षुषा पश्यन्ति ?

(१४) स्फोट: क्रमजन्मवान् भवति / न भवति ?

(१५)　अक्रमः क्रमरूपेण को भासते ?

........................................................................................................................................................